# ॥ स्कन्दलहरी ॥

.. skandalaharI ..

sanskritdocuments.org

January 3, 2017

# .. skandalaharI ..

# ॥ स्कन्दलहरी ॥

## Sanskrit Document Information

Text title : skandalaharI

File name : skandalaharI.itx

Location : doc_subrahmanya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com, PSA Easwaran

Description-comments : Subrahmanya Stuti Manjari, Mahaperiaval Trust

Acknowledge-Permission: Mahaperiaval Trust

Latest update : January 3, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

January 3, 2017

*sanskritdocuments.org*

# ॥ स्कन्दलहरी ॥

ॐ श्रीगणेशाय नमः ।
श्रीः ।
श्रियै भूयाः श्रीमच्छरवणभव त्वं शिवसुतः
प्रियप्राप्त्यै भूयाः प्रतनगजवक्त्रस्य सहज ।
त्वयि प्रेमोद्रेकात्प्रकटवचसा स्तोतुमनसा
मयाऽऽरब्धं स्तोतुं तदिदमनुमन्यस्व भगवन् ॥ १॥

निराबाधं राजच्छरदुदितराकाहिमकर-
प्ररूढज्योत्स्नाभास्मितवदनषट्कस्त्रिणयनः ।
पुरः प्रादुर्भूय स्फुरतु करुणापूर्णहृदयः
करोतु स्वास्थ्यं वै कमलदलबिन्दूपमहृदि ॥ २॥

न लोकेऽन्यं देवं नतजनकृतप्रत्ययविधिं var नतजनपरित्राण निपुणं
विलोके भीतानां निखिलभयभीतैकशरणम् । var विध्वंसनचणम् ।
कलौ कालेऽप्यन्तर्हरसि तिमिरं भास्कर इव
प्रलुब्धानां भोगेष्वपि निखिलभोगान्वितरसि ॥ ३॥

शिव स्वामिन् देव श्रितकलुषनिःशेषण गुरो var शेषण विभो
भवध्वान्तध्वंसे मिहिरशतकोटिप्रतिभट ।
शिवप्राप्त्यै सम्यक्फलितसदुपायप्रकटन
ध्रुवं त्वत्कारुण्ये कलिरपि कृती भूपविभवः ॥ ४॥

अशक्तानां कर्मस्वपि निखिलनिःश्रेयसकृतौ
पशुत्वग्रस्तानां पतिरसि विपाशत्वकलने ।
प्रशस्तानां भूम्नां निधिरसि निरोद्धा निजशुचां
अशक्तानां कर्ता जगति धृतशक्तिः किल भवान् ॥ ५॥

var जगत्कर्ता भर्ता भवसि विनिहर्ताऽन्तसमये
रुषाऽऽर्तानां हर्ता विषयिविषयाणां घटयिता
तृषाऽऽर्तानां काले परममृतवर्षी घन इव ।
मृषाज्ञानार्तानां निखिलविचिकित्सापरिहरो
विषग्रस्तानां त्वं सकलभयहर्ता विलससि ॥ ६॥

रसाधिक्यं भक्तैरधिकमधिकं वर्षय विभो
प्रसीद त्वं भूयः प्रकटय चिदानन्दलहरीम् ।
असारे संसारे सदसति न लिप्तं मम मनः var सदसति न सङ्गो भवतु मे
कुसीदं भूयान्मे कुशलवति निःश्रेयसपथे ॥ ७॥

महामोहारण्ये विचरति मनस्तन्नियमयन्
अहन्तां निश्शेषीकुरु करुणया त्वं स्नपय माम् ।
महीयो माहात्म्यं तव मननमार्गे स्फुरतु मे
महस्स्तोमाकारे त्वयि मतिजुषि स्यात्क्व नु तमः ॥ ८॥

वलक्षाभं स्निग्धं वदनकमलेभ्यः प्रसृमरं
मिलत्कारुण्यार्द्रं मृदितभुवनार्ति स्मितपदम् ।
पुलिन्दापत्यस्य प्रकटपुलकोद्रेकजनकं
दलद्दैन्यं खेदं हरतु सततं नः सुरगुरो ॥ ९॥ var नः शरजने
अतीतो ब्रह्मादीन् कृतिमुखकृतः कारणपतीन्
क्षितिस्तोयं वह्निर्मरुदसि वियत्तत्त्वमखिलम् ।
पतिः कृत्यानां त्वं परिणतचिदात्मेक्षणवतां
धृतिस्त्वं ध्यातः सन् दिशसि निजसायुज्यपदवीम् ॥ १०॥

त्वदात्मा त्वच्चित्तस्त्वदनुभवबुद्धिस्मृतिपथः
त्वया व्याप्तं सर्वं जगदिदमशेषं स्थिरचरम् । var त्वया व्याप्त्वदलोकः
सदा योगी साक्षाद्व्रजति तव सारूप्यममलं
त्वदायत्तानां किं न हि सुलभमष्टौ च विभवाः२॥ ११॥ var भवति दुरवापं त्रिजगति ॥

कति ब्रह्मणो वा कति कमलनेत्राः कति हराः
कति ब्रह्माण्डानां कति च शतकोटिष्वधिकृताः ।
कृताज्ञाः सन्तस्ते विविधकृतिरक्षाभृतिकराः
अतः सर्वैश्वर्यं तव यदपरिच्छेद्यविभवम् ॥ १२॥

नमस्ते स्कन्दाय त्रिदशपरिपालाय महते
नमः क्रौञ्चाभिख्यासुरदलनदक्षाय भवते ।
नमः शूरक्रूरत्रिदशरिपुदण्डाध्वरकृते var नमः प्रष्ठ क्रूर
नमो भूयो भूयो नतिकृदवने जागरवते ॥ १३॥

शिवस्त्वं शक्तिस्त्वं तदुभयतमैक्यं पृथगसि
var शिवस्त्वं शक्तिस्त्वं प्रथयसि तदैक्यं गुह विभो
स्तवे ध्याने पूजाजपनियममुख्येष्वभिरताः ।
भुवि स्थित्वा भोगान् सुचिरमुपभुज्य प्रमुदिताः
भवन्ति स्थाने तत् तदनु पुनरावृत्तिविमुखाः ॥ १४॥ var भवन्ति त्वत्स्थाने

गुरोर्विद्यां लब्ध्वा सकलभयहन्त्रीं जपपराः
पुरश्चर्यामुख्यक्रमविधिजुषो ध्याननिपुणाः ।
व्रतस्थैः कामौघैरभिलषितवाञ्छां प्रियभुजः
चिरं जीवन्मुक्ता जगति विजयन्ते सुकृतिनः ॥ १५॥

शरज्ज्योत्स्नाशुभ्रं स्फटिकनिकुरुम्बाभरुचिरं var स्फटिकनिकुरुम्बान्तिविमलं
स्फुरन्मुक्ताहारं धवलवसनं भावयति यः ।
प्ररोहत्कारुण्यामृतबहुलधाराभिरभितः
चिरं सिक्तात्मा वै स भवति च विच्छिन्ननिगडः ॥ १६॥

वृधा कर्तुं दुष्टान् विविधविषवेगान् शमयितुं
सुधारोचिष्कोटि प्रतिभटरुचिं भावयति यः ।
अधः कर्तुं साक्षाद्भवति विनतासूनुमचिरात् var कर्तुं भक्तो भवति
विधत्ते सर्पाणां विविधविषदर्पापहरणम् ॥ १७॥

प्रवालाभापूरे प्रसरति महस्ते जगदिदं
दिवं भूमिं काष्ठाः सकलमपि सञ्चिन्तयति यः ।
द्रवीकुर्याच्चेतस्त्रिदशनिवहानामपि सुखाद्-
भुवि स्त्रीणां पुंसां वशयति तिरश्चामपि मनः ॥ १८॥

नवाम्भोदश्यामं मरकतमणिप्रख्यमथ वा
भवन्तं ध्यायेद्यो भवति निपुणो मोहनविधौ ।
दिविष्ठानां भूमावपि विविधदेशेषु वसतां
नृणां देवानां वा वियति चरतां पत्रिफणिनाम् ॥ १९॥

var ध्रुवं पक्षीणां वा भुजगवनितानां सपदि सः ॥ १९
कुमार श्रीमंस्त्वां कनकसदृशाभं स्मरति यः
समारब्धस्तम्भे सकलजगतां वा प्रभवति ।

समस्तद्युःस्थानां प्रबलपृतनानां सवयसां
प्रमत्तव्याघ्राणां किटिहयगजानां च सपदि ॥ २०॥

घटात्कारैः साकं सहकृतमहाधूमपटल- var छटात्कारैः साकं
स्फुटाकारं साक्षात्स्मरति यदि मन्त्री सकृदपि ।
हठादुच्चाटाय प्रभवति मृगाणां स पततां
पटुर्विद्वेषे स्याद्विधिरचितपाशं विघटयन् ॥ २१॥

स्मरन्घोराकारं तिमिरनिकुरुम्बस्य सदृशं
जपन्मन्त्रान् मर्त्यः सकलरिपुदर्पक्षपयिता ।
स रुद्रेणौपम्यं भजति परमात्मन् गुह विभो
वरिष्ठः साधूनामपि च नितरां त्वद्भजनवान् ॥ २२॥

महाभूतव्याप्तं कलयति च यो ध्याननिपुणः
स भूतैः सन्त्यक्तस्त्रिजगति च योगेन सरसः ।
गुह स्वामिन्नन्तर्दहरयति यस्त्वां तु कलयन्
जहन्मायो जीवन्भवति स विमुक्तः पटुमतिः ॥ २३॥

शिवस्वामिन् गौरीप्रियसुत मयूरासन गुहे-
त्यमून्युक्त्वा नामान्यखिलदुरितौघान् क्षपयति ।
इहासौ लोके तु प्रबलविभवस्सन् सुविचरन्
विमानारूढोऽन्ते तव भजति लोकं निरुपमम् ॥ २४॥

तव श्रीमन्मूर्तिं कलयितुमनीशोऽहमधुना
भवत्पादाम्भोजं भवभयहरं नौमि शरणम् ।
अतः सत्याद्रीश प्रमथगणनाथात्मज विभो
गुह स्वामिन् दीने वितनु मयि कारुण्यमनिशम् ॥ २५॥

भवायानन्दाब्धे श्रुतिनिकरमूलार्थमखिलं
निगृह्य व्याहर्तुं कमलजमसक्तं तु सहसा ।
ब्रुवाणस्त्वं स्वामिक्षितिधरपते देशिकगुरो var स्वामिक्षितिधरपते स्वामिमलै
गुह स्वामिन्दीने मयि वितनु कारुण्यमनिशम् ॥ २६॥

अगस्त्यप्रष्ठानाममलहृदयाब्जैकनिलयं
सकृद्वा न ध्यातं पदकमलयुग्मं तव मया ।

तथापि श्रीजन्ति स्थलनिलय देवेश वरद  var श्रीजन्ति तिरुछेन्दूर् ??
गुह स्वामिन्दीने मयि वितनु कारुण्यमनिशम् ॥ २७॥

रणे हत्वा शक्त्या सकलदनुजांस्तारकमुखान्
हरिब्रह्मेन्द्राणामपि सुरमुनीनां भुवि नृणाम् ।
मुदं कुर्वाणः श्रीशिवशिखरिनाथ त्वमखिलांआ  var शिवशिखरिनाथ शिवगिरि
गुह स्वामिन् दीने मयि वितनु कारुण्यमनिशम् ॥ २८॥

शरद्राकाजैवातृक विमलषड्वक्त्रविलसद्-
द्विषड्बाहो शक्त्या विदलितमहाक्रौञ्चशिखरिन् ।
हृदावास श्रीहल्लकगिरिपते सर्वविदुषां
गुह स्वामिन्दीने मयि वितनु कारुण्यमनिशम् ॥ २९॥

महान्तं केकीन्द्रं वरद सहसाऽऽरुह्य दिविषद्-
गणानां सर्वेषामभयद मुनीनां च भजताम् ।
बलारातेः कन्यारमण बहुपुण्याचलपते
गुह स्वामिन्दीने मयि वितनु कारुण्यमनिशम् ॥ ३०॥

महद्ब्रह्मानन्दं परशिवगुरुं सन्ततलसत्-
तटित्कोटिप्रख्यं सकलदुरितार्तिघ्नममलम् ।
हरिब्रह्मेन्द्रामरगणनमस्कार्यचरणं
गुहं श्रीसङ्गीतप्रियमहमन्तर्हृदि भजे ॥ ३१॥

नमःस्कन्ददेवाय ।

इति श्रीस्कन्दलहरी समाप्ता ।

Proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com, PSA Easwaran

.. skandalaharI ..
was typeset using XƎLaTeX 0.99996
on January 3, 2017

Please send corrections to *sanskrit@cheerful.com*